# चतुर्थः पाठः

# अहं च त्वं च



मम नाम भरतः। अहं छात्रः।



मम नाम गणेशः। अहं शिक्षकः।



मम नाम गौतमः। अहं चिकित्सकः।



मम नाम राघवः। अहं कृषकः।

© NCERT not to be republished



मम नाम मेनका। अहं छात्रा।

मम नाम प्रियंवदा। अहं शिक्षिका।





मम नाम सुमित्रा। अहं चिकित्सिका।

मम नाम राधिका। अहं सैनिकी।





Reprint 2026-27

# पुंलिङ्गम्





| | | |
|---|---|---|
| त्वं कः ?<br>अहं सैनिकः। | युवां कौ ?<br>आवां सैनिकौ। | यूयं के ?<br>वयं सैनिकाः। |





| | | |
|---|---|---|
| त्वं कः ?<br>अहं गायकः। | युवां कौ ?<br>आवां गायकौ। | यूयं के ?<br>वयं गायकाः। |






| | | |
|---|---|---|
| त्वं कः ?<br>अहं पत्रकारः। | युवां कौ ?<br>आवां पत्रकारौ। | यूयं के ?<br>वयं पत्रकाराः। |





| | | |
|---|---|---|
| त्वं कः ?<br>अहं पाचकः। | युवां कौ ?<br>आवां पाचकौ। | यूयं के ?<br>वयं पाचकाः। |


© NCERT not to be republished



Reprint 2026-27

# स्त्रीलिङ्गम्





| | | |
|---|---|---|
| त्वं का ?<br>अहं गायिका। | युवां के ?<br>आवां गायिके। | यूयं काः ?<br>वयं गायिकाः। |





| | | |
|---|---|---|
| त्वं का ?<br>अहं तन्त्रज्ञा। | युवां के ?<br>आवां तन्त्रज्ञे। | यूयं काः ?<br>वयं तन्त्रज्ञाः। |





| | | |
|---|---|---|
| त्वं का ?<br>अहं नर्तकी। | युवां के ?<br>आवां नर्तक्यौ। | यूयं काः ?<br>वयं नर्तक्यः। |






| | | |
|---|---|---|
| त्वं का ?<br>अहं पाचिका। | युवां के ?<br>आवां पाचिके। | यूयं काः ?<br>वयं पाचिकाः। |


© NCERT not to be republished




Reprint 2026-27



त्वं चित्रकारः असि।
युवां चित्रकारौ स्थः।
यूयं चित्रकाराः स्थ।



अहम् आरक्षकः अस्मि।
आवाम् आरक्षकौ स्वः।
वयम् आरक्षकाः स्मः।



त्वं गायिका असि।
युवां गायिके स्थः।
यूयं गायिकाः स्थ।



अहं चिकित्सिका अस्मि।
आवां चिकित्सिके स्वः।
वयं चिकित्सिकाः स्मः।

© NCERT not to be republished



Reprint 2026-27

**'म्' इत्यस्य अनुस्वारस्य च लेखननियमः**

व्यञ्जनवर्णात् पूर्वं पदान्तस्य 'म्' इत्यस्य स्थाने 'अनुस्वारः' लेखनीयः।

यथा – पुस्तकं नास्ति। पुस्तकम् अस्ति।

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| मम | मदीयम् | मेरा / मेरी | My / Mine | |
| नाम | अभिधानम् | नाम | Name | |
| अहम् | अहम् | मैं | I | |
| आवाम् | आवाम् | हम दोनों | We both | |
| वयम् | वयम् | हम लोग | We all | |
| त्वम् | त्वम् | तुम | You | |
| युवाम् | युवाम् | तुम दोनों | You both | |
| यूयम् | यूयम् | तुम लोग | You all | |
| अस्ति | वर्तते | है | Is | |
| स्तः | वर्तेते | (दो) हैं | (Both) Are | |
| सन्ति | वर्तन्ते | हैं | Are | |
| सैनिकः | भटः | सैनिक | Soldier | |
| तन्त्रज्ञः | सङ्गणकज्ञः | तन्त्रज्ञ | Computer Engineer | |
| पत्रकारः | वार्ताहरः | पत्रकार | Journalist | |
| नर्तकी | नृत्याङ्गना | नर्तकी | Female Dancer | |
| चित्रकारः | आलेख्यकारः | चित्रकार | Illustrator | |
| आरक्षकः | आरक्षी | आरक्षक | Policeman | |
| चिकित्सिका | चिकित्सिका | वैद्या | Female Doctor | |

© NCERT not to be republished



Reprint 2026-27

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| छात्रः | विद्यार्थी | छात्र | Student | |
| लेखकः | लेखनकर्ता | लेखक | Writer | |
| क्रीडकः | खेलकः | खिलाड़ी | Player | |
| गायकः | गायनः | गायक | Singer | |
| चालकः | चालकः | चालक | Driver | |
| छात्रा | विद्यार्थिनी | छात्रा | Girl Student | |
| द्रविणम् | वित्तम् | धन | Wealth | |



## वयम् अभ्यासं कुर्मः

१. उच्चैः पठन्तु अवगच्छन्तु च—

**त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव।**
**त्वमेव विद्या द्रविणं त्वमेव, त्वमेव सर्वं मम देवदेव॥**

त्वम् एव माता, त्वम् एव पिता, त्वम् एव बन्धुः, त्वम् एव सखा,
त्वम् एव विद्या, त्वम् एव द्रविणम्, देवदेव! त्वम् एव मम सर्वम्।

२. उदाहरणानुगुणम् अधोलिखितेषु वाक्येषु पट्टिकातः उचितैः पदैः रिक्तस्थानानि पूरयन्तु—

त्वं युवां यूयं अहम् आवां वयं

**यथा** – त्वं छात्रः असि।

(क) .................. शिक्षकौ स्वः।

(ख) मञ्चे .................. नर्तक्यः स्थ।

(ग) अत्र .................. अस्मि।

(घ) सभायां .................. गायिके स्थः।

(ङ) विद्यालये .................. स्मः।

(च) वैद्यालये .................. चिकित्सिका असि।

© NCERT not to be republished



Reprint 2026-27

३. चित्रं दृष्ट्वा उदाहरणस्य अनुगुणं वाक्यानि लिखन्तु—

यथा –

| | | |
|---|---|---|
| अहं शिक्षकः अस्मि। | आवां शिक्षकौ स्वः। | वयं शिक्षकाः स्मः। |

(क)

| | | |
|---|---|---|
| अहं तन्त्रज्ञः अस्मि। | ............ ............ स्वः। | ............ ............ स्मः। |

(ख)

| | | |
|---|---|---|
| अहं नर्तकः अस्मि। | ............ ............ स्वः। | ............ ............ स्मः। |

(ग)

| | | |
|---|---|---|
| अहं चालकः अस्मि। | ............ ............ स्वः। | ............ ............ स्मः। |

© NCERT not to be republished



Reprint 2026-27


यथा – अहम् आरक्षिका अस्मि। | आवाम् आरक्षिके स्वः। | वयम् आरक्षिकाः स्मः।

(घ)

अहं छात्रा अस्मि। | ............ ............ स्वः। | ............ ............ स्मः।

(ङ)

अहं गायिका अस्मि। | ............ ............ स्वः। | ............ ............ स्मः।

(च)


  

अहम् अनुवैद्या अस्मि। | ............ ............ स्वः। | ............ ............ स्मः।

© NCERT not to be republished



Reprint 2026-27



यथा –

| त्वं चिकित्सकः असि। | युवां चिकित्सकौ स्थः। | यूयं चिकित्सकाः स्थ। |
|---|---|---|

(छ)



| त्वं लेखकः असि। | ............ ............ स्थः। | ............ ............ स्थ। |
|---|---|---|

(ज)



| त्वं सैनिकः असि। | ............ ............ स्थः। | ............ ............ स्थ। |
|---|---|---|

(झ)





| त्वं क्रीडकः असि। | ............ ............ स्थः। | ............ ............ स्थ। |
|---|---|---|

© NCERT not to be republished




Reprint 2026-27



यथा –

| त्वं क्रीडिका असि। | युवां क्रीडिके स्थः। | यूयं क्रीडिकाः स्थ। |
|---|---|---|

(ञ)



| त्वम् अधिवक्त्री असि। | ............ ............ स्थः। | ............ ............ स्थ। |
|---|---|---|

(ट)



| त्वं छात्रा असि। | ............ ............ स्थः। | ............ ............ स्थ। |
|---|---|---|

(ठ)



| त्वं धाविका असि। | ............ ............ स्थः। | ............ ............ स्थ। |
|---|---|---|

© NCERT not to be republished



Reprint 2026-27

४. **उदाहरणानुगुणं वाक्यानि परस्परं योजयन्तु —**

| | | | |
|---|---|---|---|
| **यथा** – | त्वं बालिका असि। | युवां बालिके स्थः। | यूयं बालिकाः स्थ। |
| (क) | त्वं बालिका असि। | आवां शिक्षकौ स्वः। | वयम् आरक्षकाः स्मः। |
| (ख) | अहं गायकः अस्मि। | युवां चिकित्सकौ स्थः। | यूयं बालिकाः स्थ। |
| (ग) | त्वं छात्रः असि। | आवां तन्त्रज्ञौ स्वः। | यूयं गृहिण्यः स्थ। |
| (घ) | अहं शिक्षकः अस्मि। | युवां बालिके स्थः। | यूयं चिकित्सकाः स्थ। |
| (ङ) | अहं नर्तकी अस्मि। | युवां सैनिकौ स्थः। | यूयं छात्राः स्थ। |
| (च) | त्वं गृहिणी असि। | आवां गायकौ स्वः। | वयं शिक्षकाः स्मः। |
| (छ) | अहम् आरक्षकः अस्मि। | युवां छात्रौ स्थः। | वयं नर्तक्यः स्मः। |
| (ज) | त्वं सैनिकः असि। | आवाम् आरक्षकौ स्वः। | वयं तन्त्रज्ञाः स्मः। |
| (झ) | त्वं चिकित्सकः असि। | आवां नर्तक्यौ स्वः। | यूयं सैनिकाः स्थ। |
| (ञ) | अहं तन्त्रज्ञः अस्मि। | युवां गृहिण्यौ स्थः। | वयं गायकाः स्मः। |

५. **उदाहरणानुगुणम् उत्तराणां प्रश्ननिर्माणं कुर्वन्तु —**

| | | | |
|---|---|---|---|
| **यथा** – | त्वं चिकित्सकः। | कः चिकित्सकः ? | त्वं कः ? |
| (क) | त्वं तन्त्रज्ञः। | ................................ | ................................ |
| (ख) | युवां बालकौ। | ................................ | ................................ |
| (ग) | यूयं छात्राः। | ................................ | ................................ |
| (घ) | अहं न्यायाधीशः। | ................................ | ................................ |
| (ङ) | आवां गायिके। | ................................ | ................................ |
| (च) | वयं शिक्षिकाः। | ................................ | ................................ |



## योग्यताविस्तरः

- भवान्/भवती, भवन्तौ/भवत्यौ, भवन्तः/भवत्यः – एतेषां प्रयोगः प्रथमपुरुषस्य क्रियापदेन सह भवति।

© NCERT not to be republished

- त्वं, युवां, यूयम् – एतेषां प्रयोगः मध्यमपुरुषस्य क्रियापदेन सह भवति।
- अहम्, आवां, वयम् – एतेषां प्रयोगः उत्तमपुरुषस्य क्रियापदेन सह भवति।

| पुरुषः | एकवचनम् | | द्विवचनम् | | बहुवचनम् | |
|---|---|---|---|---|---|---|
| प्रथमपुरुषः | भवान् / भवती | **अस्ति** | भवन्तौ / भवत्यौ | **स्तः** | भवन्तः / भवत्यः | **सन्ति** |
| मध्यमपुरुषः | त्वम् | **असि** | युवां | **स्थः** | यूयं | **स्थ** |
| उत्तमपुरुषः | अहम् | **अस्मि** | आवां | **स्वः** | वयं | **स्मः** |

| पुरुषः | एकवचनम् | | द्विवचनम् | | बहुवचनम् | |
|---|---|---|---|---|---|---|
| प्रथमपुरुषः | भवान् / भवती<br>सः / सा | **गच्छति** | भवन्तौ / भवत्यौ<br>तौ / ते | **गच्छतः** | भवन्तः / भवत्यः<br>ते / ताः | **गच्छन्ति** |
| मध्यमपुरुषः | त्वम् | **गच्छसि** | युवां | **गच्छथः** | यूयं | **गच्छथ** |
| उत्तमपुरुषः | अहम् | **गच्छामि** | आवां | **गच्छावः** | वयं | **गच्छामः** |

© NCERT not to be republished





**गीतम् – अहं पठामि**

अहं पठामि संस्कृतम्।
अहं वदामि संस्कृतम्।
अहं लिखामि संस्कृतम्।
सदैव सुन्दराक्षरम्॥





अहं स्मरामि मातरम्।
अहं भजामि मातरम्।
अहं नमामि मातरम्।
सदैव भक्तिपूर्वकम्॥



Reprint 2026-27



## परियोजनाकार्यम्

**अस्मद्-युष्मद्-शब्दयोः सर्वाणि रूपाणि स्फोरकपत्रे लिखन्तु—**





### अस्मद्-शब्दरूपाणि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | | | |
| द्वितीया | | | |
| तृतीया | | | |
| चतुर्थी | | | |
| पञ्चमी | | | |
| षष्ठी | | | |
| सप्तमी | | | |





### युष्मद्-शब्दरूपाणि

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | | | |
| द्वितीया | | | |
| तृतीया | | | |
| चतुर्थी | | | |
| पञ्चमी | | | |
| षष्ठी | | | |
| सप्तमी | | | |

© NCERT not to be republished





Reprint 2026-27